# Shri Durga Kavacham 4

# શ્રીદુર્ગાકવચમ્ ૪

## Document Information

Text title : durgAkavacham 4

File name : durgAkavacham4.itx

Category : devii, devI, durgA, kavacha

Location : doc_devii

Proofread by : Aruna Narayanan

Latest update : October 17, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 17, 2020

*sanskritdocuments.org*

# શ્રીદુર્ગાકવચમ્ ૪

શ્રી શિવ ઉવાચ -
શ ૃણુ દેવિ ! પ્રવક્ષ્યામિ અપ્રકાશ્યં મહીતલે ।
શ્રુત્વા પઠિત્વા કવચં સર્વસિદ્ધિમવાપ્નુયાત્ ॥ ૧॥

અથ દુર્ગાકવચમ્ ।
પાર્વતી મસ્તકં પાતુ કપાલં જગદમ્બિકા ।
કપાલઞ્ચાપિ ગણ્ડઞ્ચ દુર્ગા પાતુ મહેશ્વરિ ॥ ૨॥

વિશ્વેશ્વરી સદા પાતુ નેત્રઞ્ચ શિવસુન્દરી
કર્ણૌ નારાયણી પાતુ મુખં નીલ-સરસ્વતી ॥ ૩॥

કણ્ઠં મે વિજયા પાતુ વક્ષોમૂલં શિવ પ્રિયા ।
નાભિદેશં જગદ્ધાત્રી જગદાનન્દ-વલ્લભા ॥ ૪॥

હૃદયં ચણ્ડિકા પાતુ બાહૂ પરમ-દેવતા ।
કેશાંશ્ચ પઞ્ચમી વિદ્યા સભાયાં પાતુ ભૈરવી ॥ ૫॥

નિત્યાનન્દા યશઃ પાતુ લિઙ્ગં લિઙ્ગેશ્વરી સદા ।
ભવાની પાતુ મે પુત્રં પત્નીં મે પાતુ દક્ષજા ॥ ૬॥

કામાખ્યા દેહ-કમલં પાતુ નિત્યં નભોગતમ્ ।
મહાકુણ્ડલિની નિત્યં પાતુ મે જઠરં શિવા ॥ ૭॥

વહ્નિજાયા સદા યજ્ઞં પાતુ કર્મ સ્વધા પુનઃ ।
અરણ્યે વિજને પાતુ દુર્ગા દેવી રણે વને ।
જલે પાતુ જગન્માતા દેવી ત્રિભુવનેશ્વરી ॥ ૮॥

ઇત્યેવં કવચં દેવિ દુર્જ્ઞેયં રાજમોહનમ્ ।
જપેન્મત્રં ક્ષિતિતલે વશ્યં યાતિ મહીપતિઃ ॥ ૯॥

પૂજયા વરયા ભક્ત્યા ક્રિયયા ચ વિના શિવે ! ।

કેવલં જપમાત્રેણ સિદ્ધ્યત્યેવ ન સંશયઃ ॥ ૧૦॥

યા પૃચ્છા તે નિગદિતા કથિતા વરવર્ણિનિ ! ।
ઇદાનીં દેવદેવેશિ ! કિં ભૂયઃ શ્રોતુમિચ્છસિ ॥ ૧૧॥

ઇતિ મુણ્ડમાલાતન્ત્રે પાર્વતીશ્વર-સંવાદે
ષષ્ઠ પટલાન્તર્ગતં દ્વિતીયં શ્રીદુર્ગાકવચં સમ્પૂર્ણમ્ ॥ ૬॥

શ્લોકાનિ ૨૦૨-૨૧૨

Proofread by Aruna Narayanan

*Shri Durga Kavacham 4*
pdf was typeset on October 17, 2020

Please send corrections to *sanskrit@cheerful.com*